हीनः। सहार्थः। आयामः। समीपं। परिपाटी। इति मेदिनी॥ पुनरर्थः। इति मुग्धबोधटीकायां दुर्गादासः॥

अनुकः, त्रि, (अनु कामयते, अनु+कन्। कामुकः। कामी। इत्यमरः॥

अनुकम्पा, स्त्री, (अनु+कम्प्+भावे अः, स्त्रियां टाप्।) दया। कृपा। इत्यमरः॥ ("भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते"। इति रघुवंशे।)

अनुकम्प्यः, त्रिः (अनुकम्पामर्हति अनुकम्पा+अर्हार्थे यत्। अथवा अनु+कम्प् णिच्+कर्म्मणि यत्।) तरस्वी। वेगवान्। इति हारावली॥ कृपायोग्यः। दयापात्रं।
"अनुकम्प्योऽनुकम्प्यस्य स जातः स च जीवति"।
इति काव्यप्रकाशः॥
("दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्यां"।)
इति कुमारसम्भवे।)

अनुकरणं, क्ली, (अनु+कृ+ल्युट्।) अनुकारः। सदृशीकरणं। व्याकरणमते तत् द्विविधं। यत्रार्थरहितकेवलशब्दस्य सदृशकरणं तत् शब्दानुकरणं १। यत्रार्थविशिष्टस्य सदृशकरणं तदर्थानुकरणं २। इति गोयीचन्द्रटीकोपरि विद्यालङ्कारटीप्पनी॥

अनुकर्षः, पुं, (अनुकृष्यते स्वसम्बन्धेन चक्रेण, अनु+, कृष+घञ्।) रथाधःस्थितकाष्ठं। इत्यमरः॥ रथेर तला इति भाषा। रथस्याधस्तनभागे यद्दारुधारणकाष्ठं तिष्ठति यतोऽधस्तनं उपरि पट्टकर्म्म यत्र चक्रं तदनुकर्षशब्दवाच्यं। इति भरतः। आकर्षणं। इति मेदिनी॥

अनुकर्षणं, क्ली, (अनु+कृष्+भावे ल्युट्।) अवकर्षणं। आकर्षणं। इति मेदिनी॥

अनुकर्षा, [न्] पुं, (अनु+कृष्+अन्।) अनुकर्षः। रथाधःस्थितकाष्ठं। इत्यमरटीकायां रायमुकुटः॥

अनुकल्पः, पुं, (अनुकल्प्यते गौणत्वेन विधीयते, अनु+कृप्+णिच्+अच्।) मुख्यकल्पादधमः। गौणकल्पः। मुख्यस्याभावापन्नप्रतिनिधिः। यथा, "व्रीह्यभावे नीवारैर्यजेत"। इत्यमरभरतौ॥
("प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्म्मतेर्विद्यते फलं"॥
इति मनुः।)

अनुकामीनः, त्रि, (कामस्य इच्छायाः सदृशं, सादृश्यार्थे अव्ययीभावः, ततो गच्छतीत्यर्थे खः तस्य ईनः।) कामङ्गामी। स्वेच्छागमनशीलः। इत्यमरः॥

अनुकारः, पुं, (अनु+कृ+घञ्।) सदृशीकरणं। सदृशरूपवेशभाषाद्याविष्करणं। तत्पर्य्यायः। अनुहारः २। इत्यमरः॥ उपमा ३। इति हेमचन्द्रः॥
("भवेदभिनयोऽवस्थानुकारः स चतुर्व्विधः"।
इति साहित्यदर्पणे।)

अनुकूलः, त्रि, (अनुकूलं करोति, अनुकूल+करोत्यर्थे णिच् पचाद्यच्।) अप्रतिकूलः। दक्षिणः। सहायः। यथा, "मयानुकूलेन नभस्वतेरितं"। इति श्रीभागवतं॥

अनुकूलः, पुं, (अनुकूलयति केवलस्वपत्नीं सुखयति, अनुकूल+करोत्यर्थे णिच् अच्।) पतिभेदः। तस्य लक्षणं।
"सदा पराङ्गनापराङ्मुखत्वे सति स्वस्त्र्यनुरक्तत्वं"।
इति रसमञ्जरी॥ (यथा साहित्यदर्पणे,—
"एकस्यामेव नायिकायामासक्तोऽनुकूलनायकः। किन्त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतो दृष्टिं निक्षिपतीति विश्वसियता मन्यामहे दुःस्थितं"।)

अनुकूलता, स्त्री, (अनुकूलस्य भावः, अनुकूल+भावे तल् स्त्रियां टाप्।) आनुकूल्यं। तत्पर्य्यायः। दाक्षिण्यं २। इति हेमचन्द्रः॥ (अनुग्रहः। दया। प्रसादः। "सुहृदिव प्रकटय्य सुखप्रदां प्रथममेकरसामनुकूलतां"। इति उत्तरचरिते।)

अनुकूला, स्त्री, (अनुकूल+स्त्रियां टाप्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

अनुक्रमः, पुं, (क्रममनुगतः, प्रादिसमासः।) यथाक्रमं। तत्पर्य्यायः। आनुपूर्व्वी २ परिपाटी ३ आवृत् ४ पर्य्यायः ५। इत्यमरः॥ प्रतिसंक्रमणं। अनुक्रमणिका। यथा,—
"द्वादशे तु पुराणोक्तसर्व्वार्थानुक्रमः कृतः।
प्रथमस्कन्धमारभ्य प्राधान्येन समासतः"॥
इति श्रीभागवते १२ स्कन्धे १२ अध्यायटीकायां श्रीधरस्वामी॥
("कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्"
इति याज्ञवल्क्यः।)

अनुक्रमणिका, स्त्री, (अनुक्रम्यते उत्तरोत्तरं परिपाट्या आरभ्यतेऽनया, अनु+क्रम+करणे ल्युट्, स्त्रियां ङीप्, ततः स्वार्थे कन् स्त्रियां टाप्।) भूमिका। ग्रन्थादेर्मुखबन्धः। पुराणादेरुक्तविवरणस्य संक्षेपेण पुनः कथनं। इति पुराणं॥
("अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्व्वणाम्"।
इति महाभारते।)

अनुक्रोशः, पुं, (अनु+क्रुश्+घञ्।) करुणा। दया। इत्यमरः॥ ("सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या"। इति मेघदूते।)

अनुगः, त्रि, (अनुगच्छति, अनु+गम्+डः।) पश्चाद्गामी। अनुचरः। अनुसरः। तत्पर्य्यायः। अन्वक् २ अन्वक्षः ३ अनुपदः ४। इत्यमरः॥ सेवकः ५। दासः ६। इति हलायुधः॥
("येषां शास्त्रानुगा बुद्धिर्न ते मुह्यन्ति भारत"।
इति महाभारते।)

अनुगतः, त्रि, (अनुगच्छति अनु+गम्+कर्त्तरि क्तः।) अनुगः। आश्रितः। अधीनः। पश्चाद्गतः। यथा,—
"आगच्छद् यत्र काकुत्स्थः स्वर्गाय समुपस्थितः।
विमानवरकोटीभिर्देवैरनुगतस्तदा"॥
इति रामायणं॥ नियतः। यथा, "न च तदनुगतमेव अभिधावलम्बने नापि तस्य भावात्"। इति पञ्चमोल्लासे काव्यप्रकाशकारः॥

अनुगवीनः, पुं, (गोः पश्चात् अव्ययीभावः अनुगु+खः, तस्य ईनः।) गोपः। गोरक्षकः। गोः पश्चात् यथेष्टगामी। इति संक्षिप्तसारव्याकरणपरिशिष्टं।

अनुगमः, पुं, (अनु+गम्+भावे अप्।) पश्चाद्गमनं। उपसर्पणं। यथा,—
"कृते तु दीयते गत्वा त्रेतायामाहूताय वै।
द्वापरे याचमानाय कलौ त्वनुगमान्विते"॥
इति स्मृतिः॥ न्यायमते येन रूपेण तावत्पदार्थग्रहः तदेव रूपं तावत्पदार्थानुगमकं तस्य क्रिया॥

अनुगमनं, क्ली, (अनु साहित्येन गमनं, अनु+गम्+भावे ल्युट्।) सहगमनं। यथा, "अष्टौ लोकपाला आदित्यचन्द्रानिलाग्न्याकाशभूमिजलहृदयावस्थितान्तर्यामिपुरुषयमदिनरात्रिसन्ध्याधर्म्माः! यूयं साक्षिणो भवत ज्वलचितारोहणेन भर्त्तृशरीरानुगमनमहं करोमि"। इति शुद्धितत्त्वं॥

अनुगामी, [न्] त्रि, (अनुगच्छति, अनु+गम्+णिनि।) कामंगामी। इति हेमचन्द्रः॥ सहचरः २। पश्चाद्गामी ३। यथा,—
"दृष्ट्वा श्रियमिवायान्तीं छायामनुगामिनीं"।
इति रामायणं॥

अनुग्रहः, पुं, (अनु+ग्रह्+अप्।) दुःखदूरकरणेच्छा। अनिष्टवारणपूर्व्वकेष्टसाधनं। तत्पर्य्यायः। अभ्युपपत्तिः २। इत्यमरः॥
("विजयोन्मत्तनिःस्वानामकुत्सापूर्व्वकं हि यत्।
पूरणं दानमानाभ्यामनुग्रह उदाहृतः"॥
इत्युक्तलक्षणा दारिद्र्यादिजनितदुःखहरणेच्छा।
("महाननुग्रहो मे स्यादाश्रमस्य महात्मना"।
इति रामायणे।)

अनुचरः, त्रि, (अनु साहित्येन चरति गच्छति, अनु+चर+ट।) सहचरः। सहायः। इत्यमरः॥ दासः। इति हलायुधः॥ ("अनुचरेण धनाधिपतेरथो"। इति भारविः।
"पैतृकं वाञ्छतो राज्यं पार्थस्यानुचरा वधुः"।
इति रामायणं।)

अनुच्छिष्टः, त्रि, (उत्+शिष्+क्त, नञ्समासः।) उच्छिष्टभिन्नः। पवित्रः। इति हलायुधः॥
("लक्ष्म्या निमन्त्रयाञ्चक्रे तमनुच्छिष्टसम्पदा"।
इति रघुवंशे।)

अनुजं, क्ली, प्रपौण्डरीकनामसुगन्धिद्रव्यं। इति राजनिर्घण्टः॥

अनुजः, पुं, (अनु पश्चात् जायते, अनु+जन्+ड।) कनिष्ठभ्राता। तत्पर्य्यायः। जघन्यजः २ कनिष्ठः ३ यवीयान् ४ अवरजः ५। इत्यमरः॥ कनीयान् ६ यविष्ठः ७। इति जटाधरः। जघन्यः ८! इति शब्दरत्नावली॥

अनुजा, स्त्री, (अनु पश्चात् जाता, अनु+जन्+ड+स्त्रियां टाप्।) कनिष्ठा भगिनी। यथा,—
"भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं पयः"।
इति तिथ्यादितत्त्वं॥